"ऋष्टीरायुधविशेषान्"। इति भाष्यम्। तथा मनुः ३। १३३।

"यावतो ग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित्।
तावतो ग्रसते प्रेत्य दीप्तशूलर्ष्ट्ययोगुड़ान्"॥

"ज्वलितशूलर्ष्ट्याख्यायुधलोहपिण्डान्"। इति तट्टीका॥ दीप्तिः। यथा, ऋग्वेदे ३। ५४। १३।

"विद्युद्रथा मरुत ऋष्टिमन्तो
दिवो मर्या ऋतजाता अयासः"।

"ऋष्टिमन्तो दीप्तिमन्तः"। इति भाष्यम्॥ गमनागमनशीलः। यथा, ऋग्वेदे १। ६४। ४॥ "अंसेष्वेषां निमिमृक्षुर्ऋष्टयः साकं यज्ञिरे स्वधया दिवो नरः"। "ऋष्टयः गमनागमनशीलाः"। इति दयानन्दभाष्यम्॥ पुं, धर्म्मसावर्णिके मन्वन्तरे ऋषिभेदः। यथा, मार्कण्डेये। ९४। १९।

"हविष्मांश्च वरिष्ठश्च ऋष्टिरन्यस्तथारुणिः"॥)

ऋष्यः, पुं स्त्री, (ऋष्+यत्। निपातनात् सिद्धम्।) मृगविशेषः। इत्यमरः॥ (यथा महाभारते ऋष्यशृङ्गोपाख्याने। ३। ११०। २७।

"ऋष्यशृङ्गः कथं मृग्यामुत्पन्नः काश्यपात्मजः"।

ऋष्यस्य मृगविशेषस्य शृङ्गमिव शृङ्गं यस्य स ऋष्यशृङ्गः।

"ऋष्यो नीलाङ्गको लोके सरोह्य इति कीर्त्तितः"॥

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥) स्वनामख्यातः कुरुवंशीयो देवातिथिपुत्त्रः। यथा, भागवते। ९। २२। ११।

"ततश्च क्रोधनस्तस्माद् देवातिथिरमुष्य च।
ऋष्यस्तस्य दिलीपोऽभूत् प्रतीपस्तस्य चात्मजः"॥

ऋष्यकेतुः, पुं, (ऋष्यः केतौ यस्य।) अनिरुद्धः। इति त्रिकाण्डशेषः॥ अस्य रूपान्तराणि। ऋश्यकेतुः। ऋष्यकेतनः। रिष्यकेतुः। विश्वकेतुः॥

ऋष्यगता, स्त्री, (ऋष्येण ऋषिसमूहेन गता ज्ञाता।) ऋष्यप्रोक्तावृक्षः। इति शब्दरत्नावली॥

ऋष्यगन्धा, स्त्री, (ऋष्यस्य मृगविशेषस्य गन्ध इव गन्धो यस्याः।) वृद्धविशेषः। ऋषिजाङ्गल इति ख्यातः। तत्पर्य्यायः। ऋद्धगन्धा २ ऋषिजाङ्गलिकी ३। इति रत्नमाला॥

("महासहा-ऋद्धि-ऋष्यगन्धाश्वगन्धेत्यादिषु"॥
इति चरके विमानस्थाने अष्टमेऽध्याये॥)

ऋष्यप्रोक्ता, स्त्री, (ऋष्येण ऋषिसमूहेन प्रोक्ता।) शतमूली। शूकशिम्बी। अतिबला। इति मेदिनी॥ (अस्याः पर्य्यायो यथा॥

"अतिबला महाशतावरी कपिकच्छुश्च"।
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥

व्यवहारो यथा॥

"ऐन्द्र्यृषभ्यतिरसर्ष्यप्रोक्तापयस्येत्यादिषु"।

इति चरके सूत्रस्थाने चतुर्थेऽध्याये॥ अत्र तु ऋष्यप्रोक्ता माषपर्णी इति शिवदासीयटीका॥ ॰॥

"कुक्कुटी सर्पगन्धा च तथा काण्डविषाणिके।
ऋष्यप्रोक्ता वयस्था च शृङ्गी मोहनवल्लिका"॥

इति उत्तरतन्त्रे षष्टितमेऽध्याये सुश्रुतेनोक्तम्॥)

ऋष्यमूकः, पुं, (ऋष्यो मृगो मूको यत्र।) पर्व्वतविशेषः। इति जटाधरः॥ स तु दक्षिणदेशे पम्पासरोवरकूले स्थितः। यत्र वालिभयात् सुग्रीवादयः पञ्च वानराः स्थिताः॥ इति रामायणम्॥

("तावृष्यमूकस्य समीपचारी
चरन् ददर्शाद्भुतदर्शनीयौ"।

इति रामायणे। ४। १। १२८॥)

ऋष्यशृङ्गः, पुं, (ऋष्यस्य मृगस्य शृङ्गमिव शृङ्गमस्य।) मुनिविशेषः। स तु विभाण्डकसुतः। तस्य भार्य्या लोमपादराजकन्या शान्ता। इति रामायणम्॥ ("मान्यो मुनिः स्वां पुरमृष्यशृङ्गः"। इति भट्टिः। १। १०॥ अस्य जन्मनः प्रभृति विवरणमुच्यते।

आसीत्पुरा महातेजास्तपस्विसत्तमः काश्यपो विभाण्डको नाम ऋषिः। स च महाह्रदं समासाद्य दीर्घकालं तपसि स्थितः। एकदाप्सरसमुर्व्वशीं दृष्ट्वा चलितचित्तस्यास्य रेतः अप्सु प्रचस्कन्द। ततः काचित् मृगी तृषिता तोयेन सह तत्पीत्वा गर्भिणी अभवत्। इयं हि मृगी पुरा काचित् देवकन्यासीत् शापवशात् मृगरूपधारिणी वने विचरन्ती स्थिता। अथामोघत्वात् ब्रह्मरेतसस्तस्यां मृग्यामेकः पुत्त्रः समभवत्। मृगीगर्भजातत्वादस्य शिरसि शृङ्गमजायत तेनास्य ऋष्यशृङ्ग इति नाम समभवत्। अनेन हि पितुरन्यः कोऽपि मानुषो न दृष्टपूर्व्वस्तस्मादनन्यविषयं अस्य मनः सदा ब्रह्मचर्य्ये एवाभवत्। एतस्मिन्नेव काले दशरथस्य बन्धुर्लोमपाद इति ख्यातोऽङ्गानामीश्वरः समभवत्। तेन कामात् ब्राह्मणस्य मिथ्याकृतम्। अस्मात् सर्व्वे ब्राह्मणास्तं परितत्यजुः। प्रणष्टयज्ञस्यास्य राज्ये न ववर्ष शतक्रतुः। अतः क्लिष्टचित्तः स राजा ब्राह्मणान् सन्तोषयित्वा कञ्चिदुपायं पर्य्यपृच्छत्। तेन पृष्टास्ते ब्राह्मणा यत्नार्थं ऋष्यशृङ्गमानेतुं उपदिदिशुः। अथ स राजा दुष्करत्वादस्य कार्य्यस्य ऋष्यशृङ्गमानेतुं शापाद्भीताभिर्वाराङ्गनाभिर्यत्नमकरोत्। अथ रूपयौवनसम्पन्नाः काश्चित् वाराङ्गना बहूनि उपायद्रव्याणि गृहीत्वा जलपथेन तं तपोधनम् लोभयित्वानेतुं प्रतस्थिरे। अथ ताः काश्यपस्याश्रमं समासाद्य व्याजकृताश्रमां नावमदूरे निबध्य तत्रोत्तस्थुः। अथ कदाचित् तासां काचित् कुशला ऋषेः सुतं तं दृष्ट्वा वाग्भङ्ग्या मोहयित्वा विचित्राणि माल्यानि वासांसि च दत्त्वा पेयानि च पाययित्वा तेन सह चिक्रीड़ प्रजहास च। एतादृशेन विविधोपायेन तं प्रापयित्वा कामवशतां अग्निहोत्रस्योपदेशं कृत्वा च स्वस्थानमाजगाम। गतायाश्च तस्यां मदनेन मत्तो विचेतनश्चाभवदृष्यशृङ्गः। अथ विभाण्डकस्तपसः प्रतिनिवृत्य स्वसुतं तथाविधं दृष्ट्वा प्रबोधयामास। प्रबोध्य तपस्यार्थं प्रस्थिते च तस्मिन् पुनः सा ऋषिरूपधारिणी वेश्या तं विभाण्डकसुतं प्रलोभ्य नाव्याश्रममानीय द्रुततरं लोमपादराज्यमायता। अथ स राजा त प्राप्य विभाण्डकसुतं प्रहृष्टमना अन्तःपुरं निवेशयामास। प्रविष्टे च तस्मिन् तपोधने समस्तराज्यं प्रवृष्टं जलेनापूर्य्यमाणमभवत्। एवं स लोमपादः परिपूर्णकामः तपोधनाग्रगण्यात् विभाण्डकात् शापमुक्तिमिच्छन् स्वमित्रस्य दशरथस्य सुतां शान्तां ऋष्यशृङ्गाय प्रददौ। अथ विभाण्डको मुनिः तपसः प्रतिनिवृत्तः सुतमनवलोक्य ध्यानधिया सर्व्वमवगम्य क्रुधा ज्वलन्निव लोमपादराज्यं आजगाम। आगते च तस्मिन् विभीतैः सर्व्वैः ऋष्यशृङ्गस्य राज्यमिदमिति आचख्ये। पूजितश्च तेन राजर्षिणा दिवि इन्द्रमिव पुत्त्रं शचीमिव शान्तां स्नुषाञ्चावलोक्य ग्रामांश्च घोषांश्च सुतस्य इत्यवगम्य शान्तकोपः स्वाश्रमं प्रति प्रययौ। अथ स ऋष्यशृङ्गः शान्तया सह तस्मिन् राज्ये सुखमतिचिरमवसत्॥

अथ गच्छति काले सूर्य्यवंशावतंसो राजा दशरथः अनपत्यतया क्लिश्यमानहृदयो निजगुरुं वशिष्ठदेवं पुत्त्रलाभोपायं प्रपच्छ। एवमुक्तस्तेन ऋषिप्रवरो वशिष्ठः लोमपादराज्यात् ऋष्यशृङ्गं तपोधनं समानीय पुत्त्रेष्टिं कर्तुं समादिशत्। अथासौ राजा एवमभिहितः स्वजामातरममुं ऋष्यशृङ्गमानेतुं यत्नमकरोत्। तत आगतेन तेन क्रियमाणे यज्ञे देवश्चरुर्वह्निमध्यादुदतिष्ठत्। एतच्चरुभक्षणात् नारायणावतारस्वरूपा रामादयश्चत्वारो दशरथस्य तनया जाताः। अयं विभाण्डकसुतस्तु महाप्रतापवान् यज्ञनिष्ठश्चेति प्रसिद्धः। एतत्कथा च महाभारते। ३। ११० अध्यायस्तथा रामायणे। १। ९ अध्यायश्चारभ्य द्रष्टव्या॥ *॥ सावर्णिके मन्वन्तरे ऋषिभेदः। यथा, मार्कण्डेये ८०। ४।

"रामो व्यासो गालवश्च दीप्तिमान् कृप एव च।
ऋष्यशृङ्गस्तथा द्रौणिस्तत्र सप्तर्षयोऽभवन्"॥)

ॠ

ॠ दीर्घॠकारः। स तु अष्टमस्वरवर्णः। अस्योच्चारणस्थानं मूर्द्धा। (यथा, सिद्धान्तकौमुद्यां "ॠटुरषाणाम्मूर्द्धा"। पाणिनीयशिक्षायामपि।

"स्युर्मूर्द्धण्या ऋटुरषा दन्त्या ऌतुलसाः स्मृताः"।)

स प्लुतश्च भवति॥ इति व्याकरणम्।

(स च उदात्तानुदात्तस्वरितभेदात् त्रिधापि पुनः प्रत्येकमनुनासिकाननुनासिकभेदेन द्विधेति बहुविधः।)

ॠकारं परमेशानि स्वयं परमकुण्डलम्।
पीतविद्युल्लताकारं पञ्चदेवमयं सदा॥
चतुर्ज्ञानमयं वर्णं पञ्चप्राणयुतं सदा।
त्रिशक्तिसहितं वर्णं प्रणमामि सदा प्रिये"।

इति कामधेनुतन्त्रम्॥

(वङ्गीयभाषयाम्।) तस्य लेखनप्रकारो यथा,—

"तद्रूपाधोगता दक्षा वामतः कुञ्चिता त्वधः।
पुनरूर्द्ध्वगता रेखा तासु ब्रह्मेशविष्णवः॥
मात्रा शक्तिः परा ज्ञेया ध्यानमस्य प्रवक्ष्यते"।

इति वर्णोद्धारतन्त्रम्॥ *॥ तस्य नामानि यथा।

"ॠः क्रोधोऽतिथिशो वाणी वामनो गोऽथ श्रीधृतिः।
ऊर्द्ध्वमुखी निशानाथः पद्ममाला विनष्टधीः॥
शशिनी मोचिका श्रेष्ठा दैत्यमाता प्रतिष्ठिता।